# शास्त्रितृतीयवर्षम्, पञ्चमसत्रार्धम्,पञ्चमपत्रम्

**श्रीधर्मराजाध्वरीन्द्रप्रणीत:**

## वेदान्तपरिभाषा

**(आगमपरिच्छेदान्ता)**

**विशेषद्रष्टव्यम् : बृहद्-अक्षरै : सङ्केतिता : शब्दा : प्रश्नरूपेण ग्राह्या : , तदुत्तराणि तस्याध : निर्दिष्टानि सन्ति।**

### ग्रन्थकर्तृपरिचय:

| | | |
|---|---|---|
| वेदान्तपरिभाषाकार: | - | धर्मराजाध्वरीन्द्र: |
| धर्मराजाध्वरीन्द्रस्य परमगुरु: | - | श्रीनृसिंहाश्रम: |
| धर्मराजाध्वरीन्द्रस्य गुरु: | - | श्रीमद्वेङ्कटनाथ: |
| धर्मराजाध्वरीन्द्रस्य गुरो: निवासस्थानम् | - | वेलाङ्गुडि: |
| धर्मराजाध्वरीन्द्रस्य निवासस्थानम् | - | तामिलनाडुप्रान्त: |
| न्यायोपरिकृतग्रन्थ: | - | तर्कचूडामणि: |
| टीकाखण्डनकृता | - | तत्त्वचिन्तामणि: |
| तत्त्वचिन्तामणिकर्त्ता | - | श्रीगङ्गेशोपाध्याय: |
| मङ्गलाचरणम् | - | यदविद्याविलासेन भूतभौतिकसृष्टय:।<br>तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्।। |
| वेदान्तपरिभाषायां परिच्छेदा: | - | अष्टौ |
| ग्रन्थप्रकार: | - | प्रकरणग्रन्थ: |

**वेदान्त:**

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ।

**अनुबन्धा:**

अनुबन्धा: चत्वारो भवन्ति। यथा - अधिकारि-विषय-सम्बन्ध-प्रयोजनानि ।

**ग्रन्थे परिच्छेदा:**

अष्टौ।प्रत्यक्ष-अनमान-उपमान-आगम-अर्थापत्त-अनुपलब्धि-विषय-प्रयोजनानि इति।

**प्रथमपरिच्छेद:**

प्रत्यक्षपरिच्छेद:

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

**प्रमाणम्**

प्रमाकरणं प्रमाणम् । प्रमायाः यद्धि करणं तदेव प्रमाणम्।

**प्रमा**

स्मृतिव्यावृत्तं प्रमात्वं, अनधिगताबाधितविषयज्ञानत्वं प्रमात्वम्। स्मृतिसाधारणं त्वबाधितविषयज्ञानत्वम् ।

**प्रमाभेदः**

स्मृतिसाधारणम्, स्मृत्यसाधरणम्।

**प्रमाणसंख्या**

प्रमाणानि षट्, प्रत्यक्षानुमानोपमानागमार्थापत्यनुपलब्धिभेदात् ।

**प्रत्यक्षम् -**

प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणाम् ।

**प्रत्यक्षप्रमा**

प्रत्यक्षप्रमा चात्र चैतन्यमेव 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ.३.४.१.) इति श्रुतेः ।अपरोक्षादिस्यापरोक्षमित्यर्थः ।

**प्रत्यक्षभेदः**

प्रत्यक्षं द्विविधम् । सविकल्पकनिर्विकल्पकभेदात् ।

**सविकल्पकप्रत्यक्षम्**

सविकल्पकं वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम् ।

**निर्विकल्पकप्रत्यक्षम्**

निर्विकल्पकं तु संसर्गानवगाहिज्ञानम् । यथा - सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम् ।

**अखण्डार्थत्वम्**

संसर्गानवगाहियथार्थज्ञानजनकत्वमिति। तदुक्तम्-

**संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।**

**उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ।।**

**साक्षी**

जीवसाक्षी ईश्वरसाक्षीति द्विविधः।

**प्रत्यक्षं प्रकारान्तरेण**

पुनः प्रत्यक्षं प्रकारान्तरेण द्विविधम्, इन्द्रियजन्यं तदजन्यं चेति ।

**जीवसाक्षी**

जीवो नामान्तःकरणावच्छिन्नं चैतन्यम् तत्साक्षि तु अतःकरणोपहितं चैतन्यम् । प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम् । अयं च जीवसाक्षी प्रत्यात्मं नाना। एकत्वे मैत्रावगते

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

चैत्रस्याप्यनुसन्धानप्रसङ्गः।

## ईश्वरसाक्षी

ईश्वरसाक्षि तु मायोपहितं चैतन्यम् । तच्चैकम् । तदुपधिभूतमायाया एकत्वात् । 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूप- गुणाभिप्रायतया वोपपत्तेः ।।

**'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । (श्वे० ४.१०)**

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः ।**

**अजो होको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।।' (श्वे० ४.५)**

**'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।**

**योगी मायाममेयाय तस्मै विद्यात्मने नमः ।।१।।'**

इत्यादि श्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते । ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि, तच्चानादि तदुपाधेर्मायाया अनादित्वात् ।

## अखण्डार्थत्वम्

संसर्गानवगाहियथार्थज्ञानजनकम् अखण्डार्थत्वम्

प्रातिपदिकार्थमात्रपरत्वं वाऽखण्डार्थत्वमिति। तदुक्तम्-

**संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।**

**उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ।।**

## मनोधर्माः

'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ० १.५.३) इति श्रुतिर्मानम् । धीशब्देन वृत्तिरूपज्ञानाभिधानात् । अत एव कामादेरपि मनोधर्मत्वम् ।

## चैतन्यम्

त्रिविधं चैतन्यम्, प्रमातृचैतन्यं, प्रमाणचैतन्यं, विषयचैतन्यं चेति । तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् ।

## वृत्तिः

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते ।

## वृत्तिभेदाः

सा च वृत्तिश्चतुर्विधा संशयो, निश्चयो, गर्वः, स्मरणमिति । एवंविधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति, बुद्धिरिति, अहङ्कार इति, चित्तमिति व्याख्यायते । तदुक्तम् –

E-Content - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

**मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।**

**संशयो निश्चयो गर्वः स्मरणं विषया इमे ।।**

## विशेषणं

विशेषणं च कार्यान्वयि व्यावर्तकम् । रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम् ।

## उपाधिः

उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः । अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते ।

## ईश्वरः

मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्वरतत्साक्षिणोः । स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते । नन्वीश्वरसाक्षिणोऽनादित्वे 'तदैक्षत बहु स्यां प्रजायेय'(छा.६.२.१) इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ? उच्यते - यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषा इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते । तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितं चैतन्यमपि सादीत्युच्यते ।

## परिणामः

परिणामो नाम उपादानसमसत्ताककार्यापत्तिः । प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः।

## विवर्तः

विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः । प्रातिभासिकरजतं चैतन्यापेक्षया विवर्त इति चोच्यते ।

## बाधः

उपादानेन सह कार्यविनाशो बाधः। अस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः, तेन विनोपादानभूताया अविद्याया अनिवृत्तेः।

## निवृत्तिः

विद्यमान एवोपादाने कार्यविनाशो निवृत्तिः । अत्र विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च । तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो माबाधि । मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः ।

## अनुमानम्

अनुमितिकरणमनुमानम् । अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या । व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम् । अनुमितिकरणं च व्याप्तिज्ञानम्, तत्संस्कारोऽवान्तरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम् । तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात् । न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः, स्मृतिप्रागभावस्य संकारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात् ।

(C)Content Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

# पाठ्यसामग्री - वेदान्तपरिभाषा

**अनुमानभेद:**

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम् ।

**न्याय:**

न्यायो नामावयवसमुदाय: ।

**अवयवा:**

अवयवाश्च त्रय एव प्रसिद्धा: - प्रतिज्ञाहेतूदाहरणरूपा:, उदाहरणोपनयनिगमनरूपा वा, न तु पञ्चावयवरूपा: । अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य व्यर्थत्वात्।

**मिथ्यात्वम्**

मिथ्यात्वं च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम् । अभिमतपदं वस्तुत: स्वाश्रयाप्रसिद्ध्या असंभववारणाय । यावत्पदमर्थान्तरवारणाय । तदुक्तम् -

**सर्वेषामेव भावानां स्वाश्रयत्वेन सम्मते ।**

**प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ।इति ।।६।।**

यद्वा अयं पद: एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणम् । तदुक्तम् -

**अंशिन: स्वांशमात्यन्ताभावस्य प्रतियोगिन: ।**

**अंशित्वादितरांशीव दिगेषैव गुणादिषु ।।इति ।।७ ।**

**सत्त्वम्**

त्रिविधं सत्त्वम् - पारमार्थिकं व्यावहारिकं प्रातिभासिकं च ।पारमार्थिकं सत्त्वं ब्रह्मण:, व्यावहारिकं सत्त्वमाकाशादे:, प्रातिभसिकंत्त्वं शुक्तिरजतादे: । तथा च घट: सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम् । अस्मिन्पक्षे च घटादर्ब्रह्मणि निषेधो न स्वरूपेण, किन्तु पारमार्थिकत्वेनैवेति न विरोध:।

**उपमानम्**

तत्र सादृश्यप्रमाकरणमुपमानम्। तथा हि, नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीति:, अयं पिण्डो गोसदृश इति। तदनन्तरं भवति निश्रय:, अनेन सदृशी मदीया गौरिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

न चेदं प्रत्यक्षेण संभवति, गोपिण्डस्य तदेन्द्रियासन्निकर्षात्। नाप्यनुमानेन गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात् । नापि मदीया गौरेतद्गवयसदृशी, एतन्निष्ठसादृश्यप्रतियोगित्वाद्, यो यद्गतसादृश्यप्रतियोग, स तत्सदृश:, यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्र: मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम् । एवं विधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वात्। उपमिनोमीत्यनुव्यवसायाच्च। तस्मादुपमानं मानान्तरम्।

**आगम:**

यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम् । वाक्यजन्यज्ञाने च आकाङ्क्षा योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि ।

E-content - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

### आकाङ्क्षा

पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा ।

### योग्यता

योग्यता च तात्पर्यविषयीभूतसंसर्गाबाधः । वह्निना सिञ्चतीत्यादौ तादृशसंसर्गबाधान्न योग्यता । 'स प्रजापतिरात्मनो वपामुदखिदत्' इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्याबाधाद् योग्यता । तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदबाधाभावाद् योग्यता ।।६।।

### आसत्तिः

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः। मानान्तरोपस्थापितपदार्थस्य अन्वयबोधाभावात्पदजन्येति। अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ 'पिधेहि' इति । अत एव 'इषेत्वा' इत्यादिमन्त्रे 'छिनद्मि' इति पदाध्याहारः । अत एव विकृतिषु 'सूर्याय जुष्टं निर्वपामि, इति प्रदप्रयोगः ।

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

# शास्त्रितृतीयवर्षम्, षष्ठसत्रार्धम्,पञ्चमपत्रम्

**विशेषद्रष्टव्यम् : बृहद्-अक्षरैः सङ्केतिताः शब्दाः प्रश्नरूपेण ग्राह्याः , तदुत्तराणि तस्याधः निर्दिष्टानि सन्ति।**

E-Content: Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

**अर्थापत्तिः**

उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम् ।

**उपपाद्यम्**

येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्।यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यम् ।

**उपपादकम्**

यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम्। यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् ।

**अर्थापत्तिः द्विविधा**

दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ।

**दृष्टार्थापत्तिः**

इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्वं वा मिथ्यात्वं कल्पयतीति ।

**श्रुतार्थापत्तिः**

यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्ति-मुखेनार्थान्तरकल्पनं तत्र श्रुतार्तापत्तिः। तथा 'तरति शोकमात्मवित्' इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथाऽनुपपत्या बन्धस्य मिथ्यात्वं कल्प्यते । यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति ।

**श्रुतार्थापत्तिश्च द्विविधा-**

अभिधानानुपपत्तिः, अभिहितानुपपत्तिश्च ।

**अभिधानानुपपत्तिः-**

यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः। यथा द्वारमित्यत्र 'पिधेहि' इतिपदाध्याहारः यथा वा 'विश्वजिता यजेत' इत्यत्र 'स्वर्गकाम' इति पदाध्याहारः।

**अभिहितानुपपत्तिः-**

यत्र वाक्यावगतोऽर्थोनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति, तत्र द्रष्टव्या । यथा स्वर्गगामो ज्योतिष्टोमेन यजेत इत्यत्र स्वर्गसाधनत्वस्य क्षणिकज्योतितष्टोमयागगतयाऽवगतस्यानुपपत्त्या मध्यवर्त्यपूर्णं कल्प्यते ।

**अनुपलब्धिः**

ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम् ।

## पाठ्यसामग्री

**ज्ञानकरणाजन्य-पदम्**

अनुमानजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिध्याप्तिवारणाय अजन्यान्तं पदम् ।

**असाधारणेति पदम्**

अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति पदम् ।

**अनुभवेति विशेषणम्**

अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्ति-वारणाय अनुभवेति विशेषणम् ।

**अभाव:**

ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम् ।

**अभावश्चतुर्विध:-**

प्रागभाव: प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

**प्रागभाव:**

मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्ते: पूर्वं योऽभाव: स प्रागभाव:, स च भविष्यतीति प्रतीतिविषय: ।

**प्रध्वंसाभाव:**

तत्रैव घटस्य मुद्गरपातानन्तरं योऽभाव: स प्रध्वंसाभाव: । ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव ।

**अत्यन्ताभाव:**

यत्राधिकरणे यस्य कालत्रयेऽप्यभाव: सोऽत्यन्ताभाव:, यथा वायौ रूपात्यन्ताभाव: । सोऽपि घटादिवद् ध्वंसप्रतियोग्येव।

**अन्योन्याभाव:**

इदमिदं नेति प्रतीतिविषयोऽन्योन्याभाव: ।

अयमेव विभागो भेद: पृथक्त्वं चेति व्यवह्रियते; भेदातिरिक्तविभागादौ प्रमाणाभावात्। अयं चान्योन्याभावोऽधिकरणस्य सादिस्ते सादि:, यथा घटे पटभेद: ।अधिकरणस्यानादित्वेऽनादिरेव, यथा जीवे ब्रह्मभेद:, ब्रह्मणि वा जीवभेद:।

**भेद:**

इदमिदं नेति प्रतीतिविषयोऽन्योन्याभाव: । अयमेव विभागो भेद: पृथक्त्वं चेति व्यवह्रियते; भेदातिरिक्तविभागादौ प्रमाणाभावात्।

**भेदो द्विविध: -**

सोपाधिको निरुपाधिकश्चेति ।

©Content - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

**सोपाधिक:**

तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वम्।यथा- एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेद:। यथा वा एकस्यैव सूर्यस्य जलभाजनभेदेन भेद: तथा च एकस्यैव ब्रह्मणोऽन्त:करणभेदाद्भेद: ।

**निरुपाधिक:**

तच्छून्यत्वं निरुपाधिकत्वम्। यथा घटे पटभेद: ।

**ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोध: न वा?**

न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोध:? तात्त्विकभेदादेरनभ्युपगमेन वियदादिवदद्वैताव्याघातकत्वात्। प्रपञ्चस्याद्वैते ब्रह्मणि कल्पितत्वाङ्गीकारात् ।तदुक्तं सुरेश्वराचार्यै:-

**अक्षमा भवत: केयं साधकत्वप्रकल्पने ।**

**किन्न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ।। इति ।।८।।**

**प्रामाण्यम्**

स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारज्ञानत्वं प्रामाणयम् । ज्ञायते च प्रामाण्यं स्वत: ।

**प्रामाण्यं द्विविधम्-**

व्यावहारिकत्वावेदकत्वं पारमार्थिकतत्वावेदकत्वं चेति ।

**व्यावहारिकत्वावेदकत्वं**

ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्व प्रमाणानामाद्यं प्रामाण्यम्, तद्विषयाणां व्यवहारदशायां बाधाभावात् ।

**पारमार्थिकतत्वावेदकत्वं**

जीवब्रह्मैक्यपराणां 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२-१) इत्यादीनां 'तत्त्वमसि' (छा० ६-८-१) इत्यन्तानाम् । तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात् ।

**लक्षणम्**

लक्षणं द्विविधम्। स्वरूपलक्षणं तटस्थलक्षणं चेति ।

**स्वरूपलक्षणम् -**

स्वरूपमेव लक्षणं स्वरूपलक्षणम्, यथा सत्यादिकं ब्रह्मस्वरूपलक्षणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २-१-१) 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) इति श्रुते:।

**तटस्थलक्षणम् -**

तटस्थलक्षणं तु यावल्लक्ष्यकालमनवस्थितत्वे सति तद्व्यावर्तकं तदेव, यथा गन्धवत्त्वं पृथिवीलक्षणम् । महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गन्धाभावात् ।

**कर्तृत्वम्**

तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च

**'य: सर्वज्ञ: सर्वविद्यस्य ज्ञानमयं तप: । तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' ।। (मु० १-१-९)**

EContent- Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

इत्यादिश्रुतिर्मानम् । तादृशचिकीर्षासद्भावे 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिर्मानम् । तादृशकृतौ च 'तन्मनोऽकुरुत' इत्यादिवाक्यम् ।

ब्रह्मणो जगज्जन्मादिकारणत्वे च 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तै० ३-१) इत्यादिश्रुतिर्मानम् ।

**सृष्टिक्रमः**

तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतः अपरिमितानिरूपितशक्तिविशेष-विशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीति संङ्कल्पयति 'तदैक्षत बहुस्यां प्रजायेय' (छा० ६-२-३) इति 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतेः।

**आकाशादीनि पञ्चभूतानि**

आकाशः, वायुः, अग्निः, जलं, पृथिवी इति।

**भूतगुणाः**

तत्राकाशस्य शब्दो गुणः ।

वायोस्तु शब्दस्पर्शौ ।

तेजसस्तु शब्दस्पर्शरूपाणि ।

अपां तु शब्दस्पर्शरूपरसाः ।

पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः ।

**गुणाः -**

गुणास्सत्वरजस्तमांसि ।

**पञ्चज्ञानेन्द्रियाणि**

श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि जायन्ते ।

**श्रोत्रादीनां देवताः**

दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः ।

**मन आदीनां चतुर्णां देवताः**

मनोबुद्ध्यहङ्कारचित्तादीनां यथाक्रमं चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवताः ।

**कर्मेन्द्रियाणि**

वाक्पाणिपादपायूपस्थाख्यानि जायन्ते ।

**कर्मेन्द्रिय - देवताः**

वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः ।

**पञ्च वायवः**

प्राणापानव्यानोदानसमानाख्या जायन्ते ।

E-Content - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

तत्र प्राग्गमनवान् वायु:, प्राण: नासादिस्थानवर्ती ।

अर्वाग्गमनवानपान:, पाय्वादिस्थानवर्ती ।

विष्वग्गतिमान् व्यान:, अखिलशरीरवर्ती ।

ऊर्ध्वगमनवानुत्क्रमणवायुरुदान:, कण्ठस्थानवर्ती ।

अशितपीतान्नादिसमीकरणकर: समान:, नाभिस्थानवर्ती ।

**पञ्चीकरणम्**

आकाशमादौ द्विधा विभज्यतयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम्। एवं वायुं द्विधा विभज्य तयोरेकं भागं पुन: चतुर्द्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम् । एवं तेज आदीनामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहार: । तदुक्तम्-

'वैशेष्यात्तु तद्वादस्तद्वाद:' (ब्र० सू० २-४-२३) इति ।

'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' छा० (६-३-३) इति श्रुति: पञ्चीकरणोपलक्षणार्था।

**लिङ्गशरीरम्**

लिंङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्यामुपेत ज्ञानेन्द्रियपञ्च कर्मेन्द्रियपञ्चक प्राणादिपञ्चकसंयुक्तं जायते। तदुक्तम्–

**पञ्चप्राणमानोबुद्धिदशेन्द्रियसमन्वितम् ।**

**अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ।। १ ।। इति ।।**

**सूक्ष्मशरीरं द्विविधं–**

परमपरं च। तत्र परं हिरण्यगर्भालिङ्गशरीरम्,तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्वम्।

अपरमस्मदादिलिङ्गशरीरम्।अस्मदादिलिङ्गशरीरमहङ्कार इत्याख्यायते ।

**ऊर्ध्वलोका:**

भूम्यन्तरिक्षस्वर्महर्जनस्तप:सत्यात्मर्वा: ऊर्ध्वलोका: सप्त

**अधलोका:**

अतलवितलसुतलतलातलरसातलमहातलपातालाख्याधोलोका: सप्त

**स्थूलशरीरम्**

जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विध स्थूलशरीराणि।

तत्र जयायुजानि जरायुभ्यो जातानि, मनुष्यपश्वादिशरीराणि ।

अण्डजानि अण्डेभ्यो जातानि, पक्षिपन्नगादिशरीराणि।

स्वेदजानि स्वेदाज्जातानि, युकामशकादीनि।

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

उद्भिज्जानि भूमिमुद्भिद्य जातानि, वृक्षादीनि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम् ।

**हिरण्यगर्भ:**

हिरण्यगर्भो नाम मूर्तित्रयादन्य: प्रथमो जीव: ।

**स वै शरीरी प्रथम: स वै पुरुष उच्यते ।**

**आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तत ।। १ ।।**

'हिरण्यगर्भ: समवर्तताग्रे भूतस्य' (यजु० १३-४ ऋ० स० १०-१२०-१) इत्यादिश्रुते: ।

**प्रलय:**

प्रलयो नाम त्रैलोक्यनाश:, स च चतुर्विध:- नित्य: प्राकृतो नैमित्तिक आत्यन्तिकश्चेति।

**नित्य: -**

तत्र नित्यप्रलय: सुषुप्ति:, तस्या: सकलकार्यप्रलयरूपत्वात् । धर्माधर्मपूर्वसंस्काराणां च तदा कारणात्मनाऽवस्थानम्। तेन सुषुप्तोस्थितस्य न सुखदु:खाद्यनुभवानुपपत्ति:, न वा स्मरणानुपपत्ति: । न च सुषुप्तावन्त:करणस्य विनाशे तदधीनप्राणादिक्रियाऽनुपपत्ति:, वस्तुत: श्वासाद्यभावेऽपि तदुपलब्धे: पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत्।

यद्वा, अन्त:करणस्य द्वे शक्ती - ज्ञानशक्ति: क्रियाशक्तिश्चेति । तत्र ज्ञानशक्तिविशिष्टान्त:करणस्य सुषुप्तौ विनाश:, न क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धम् । 'यदा सुप्त: स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवति, अथैनं वाक् सर्वैर्नामभि: सहाप्येति' (कौ० ३-२) 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' (छा० ६-८-१) इत्यादिश्रुतिरुक्तसुषुप्तौ मानम् ।

**प्राकृत: -**

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तक: सकलकार्यनाश: । यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्ति:, तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षत्काराणां ब्रह्मणा सह विदेहकैवल्यम् ।

**ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।**

**परस्यान्ते कृतात्मान: प्रविशन्ति परं पदम् ।। इति श्रुते: ।।**

एवं स्वलोकवासिभि: सह कार्ये ब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनां भौतिकानां भूतानां च प्रकृतौ मयायां च लय:, न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात् । अत: प्राकृत इत्युच्यते।

**द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मण: परमेष्ठिन: ।**

**तदा प्रकृतय: सप्त कल्प्यन्ते प्रलयाय हि ।।**

**एष प्राकृतिको राजन् प्रलयो यत्र लीयते ।**

इति वचनं प्राकृतप्रलये मानम् ।

**नैमित्तक: -**

कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलय: नैमित्तिकप्रलय: । ब्रह्मणो दिवसश्चतुर्युगसहस्रपरिमितकाल:,

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति वचनम्। प्रलयकालो दिवसकालपरिमितः, रात्रिकालस्य दिवसकालतुल्यत्वात् प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि ।

**एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ।**

**शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम् ।।**

इति वचनं नैमित्तिकप्रलये मानम् ।

**तुरीयः -**

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः । स चैकजीववादे युगपदेव, नानाजीववादे तु क्रमेण । 'सर्व एकीभवन्ति' इत्यादिश्रुतेः ।

तत्राद्यास्त्रयोऽपि लयाः कर्मोपरतिनिमित्ताः, तुरीयस्तु ज्ञानोदयनिमित्तो लयो ज्ञानेन सहैवेति विशेषः।

**प्रलयक्रमः**

भूतानां भौतिकानां च न कारणलयक्रमेण लयः । कारणलयसमये कार्याणामाश्रयान्तराभावेनावस्थानानुपपत्तेः । किन्तु सृष्टिक्रमविपरीतक्रमेण । तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात् । अन्यथा न्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः ।

तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवं रूपाः प्रलयाः । तदुक्तं विष्णुपुराणे –

**जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते ।**

**तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ।। १ ।।**

**वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।**

**अव्यक्तं पुरुषे ब्रह्मन् ! निष्कले संप्रलीयते ।। २ ।। इति ।**

एवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम्।

**सृष्टिवाक्यानां तात्पर्यम्**

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्यादन्यथा सुष्टिवाक्यानामप्रामाण्यापत्तेरिति चेत् ? न। न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किन्तु अद्वितीये ब्रह्मण्येव ।

तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः ? इत्थम् – यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रपञ्चस्य प्रतिपाद्येत, तदा ब्रह्मणि निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात् । ततः सृष्टिवाक्याद् ब्रह्मोपादेयत्वज्ञाने सत्युपादानं विना कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतीत्यादीनां ब्रह्मण्यपि तस्यासत्वोपपादने प्रपञ्चस्य तुच्छत्वावगमे निरस्ताखिलद्वैतविभ्रमखण्डं सच्चिदानन्दैकरसं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यम्।

**अवस्थाः**

जाग्रत्, स्वप्नः, सुषुप्तिः इति तिस्रः

**स्वप्नावस्था**

©Content: Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थास्वप्नावस्था । जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियाजन्येति । अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायान्तःकरणेति ।

**सुषुप्तिः**

सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था । जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः । अत्र केचिन्मरणमूर्च्छयोरवस्थान्तरत्वमाहुः । अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः ।

**प्रयोजनम्**

यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम् । तच्च द्विविधम् - मुख्यं गौणं चेति ।

**मुख्यप्रयोजनम्**

तत्र सुखदुःखाभावौ मुख्यं प्रयोजनम् ।

**गौणप्रयोजनम्**

तदन्यतरसाधनं गौणं प्रयोजनम् ।

**सुखं च द्विविधम्-**

सातिशयं निरतिशयं चेति ।

**सातिशयं सुखं**

सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ० ४-३-३२) इत्यादिश्रुतेः।

**निरतिशयं सुखं**

निरतिशयं सुखं च ब्रह्मैव । 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) 'विज्ञानमानन्दं ब्रह्म' (बृ० ३-१८) इतिश्रुतेः ।

**मोक्षः**

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च, 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३-२-९) 'तरति शोकमात्मवित्' (छा० १-१-३) इत्यादिश्रुतेश्च । न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः । तस्य कृतकत्वेनानित्यत्वे भुक्तस्य पुनरावृत्त्यापत्तेः।

**श्रवणम्**

वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया ।

**मननम्**

मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः ।

**निदिध्यासनम्**

निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो

E Content Vedantaparibhasa Developed by Dr. Dayananda Panigrahi

व्यापार: ।तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्करणम् ।

## साधनचतुष्टयम्

नित्यानित्यवस्तुविवेक: इहामुत्रार्थफलभोगविराग: शमादिसम्पत्तय:,मुमुक्षुत्वं चेति।

**शम:** - अन्तरिन्द्रियनिग्रह: शम:।

**दम:** - बहिरिन्द्रियनिग्रहो दम: ।

**उपरति:** - विक्षेपाभाव उपरति: ।

**तितिक्षा** - शीतोष्णादिद्वन्द्वसहनं तितिक्षा ।

**समाधानम्** - चित्तैकाग्र्यं समाधानम् ।

**श्रद्धा** - गुरुवेदान्तवाक्ये विश्वास: श्रद्धा ।

## सगुणोपासनम्

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतु: । तदुक्तम्–

**निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वरा: ।**

**ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणै: ।। १ ।।**

**वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।**

**तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ।। २ ।। इति ।**

## सगुणोपासकानां गति:

सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्ष: ।

## कर्मिणां गति:

कर्मिणां तु धूमादिमार्गेण पितृलोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्ति: । तथा च श्रुति: 'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणा: कपूयां योनिमापद्यन्ते' (छा० ५-१०-१) इति ।

## प्रतिषिद्धानुष्ठायिनां गति:

प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदु:खमनुभूय श्वशूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलं प्रसङ्गादागतप्रपञ्चेनेति ।

EContent - Vedantaparibhasa Developed by Dr. Dayananda Panigrahi